## 'मनोगतम्' [०२.०६]     'मन की बात' (६वीं कड़ी)

## प्रसारण-तिथि : २४-नवम्बरः, २०१९

- [भाषान्तरं – सर्वश्री-डॉ.श्रुतिकान्त-पाण्डेय-गवीश-द्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

मम प्रियाः देशवासिनः, 'मन की बात'- इति प्रसारणे भवतां सर्वेषां स्वागतम् | अद्य 'मन की बात' - मनोगतम् इत्यस्य आरम्भः, भवन्तः नूनं जानन्ति, युवदेशस्य, सः उत्साहः, सा देशभक्तिः, ते सेवा-रङ्गेन रञ्जिताः नव-युवानः | नवम्बर-मासस्य चतुर्थः रविवासरः, प्रतिवर्षं NCC- दिवस-रूपेण आमान्यते | सामान्यतया अस्मदीया युव-सन्ततिः Friendship-Day इति मित्रता-दिवसं सम्यक्तया स्मरन्ति | परञ्च बहुशः जनाः तादृशाः सन्ति, ये हि NCC-दिवसम् अपि तावत्तया एव स्मरन्ति | तर्हि, आगच्छन्तु, अद्य NCC-विषये सम्वादं कुर्मः | अहम् अपि काश्चन स्मृतीः नवीकर्तुम् अवसरं लप्स्ये | सर्व-प्रथमं तु NCC-इत्यस्य सर्वेभ्यः अपि वर्तमानेभ्यः प्राक्तनेभ्यः च शिशिक्षुभ्यः NCC-दिवसस्य भूयस्यः शुभकामनाः विलसन्तुतराम् | यतो हि अहमपि भवतः इव Cadet-इति युव-शिशिक्षुः आसम्, तथा च, मनसा अपि, साम्प्रतमपि आत्मानं युव-शिशिक्षुमेव मन्ये | एतत्तु वयं सर्वे जानीमः एव - NCC- अर्थात् National Cadet Corps | जगतः बृहत्तमेषु uniformed youth organizations- इति समवृत्ति-युव-संघटनेषु भारतस्य NCC-इति अन्यतमम् | इदं हि त्रि-सेवा-संघटनम् अस्ति यस्मिन् स्थल-सेना, नौ-सेना, वायुसेनेति त्रयमपि समाविष्टम् | नेतृत्व-देशभक्ति-निःस्वार्थसेवानुशासन-कठोरश्रम- इत्येतान् सर्वान् गुणान् स्वीय-चरित्रस्य अङ्गत्वेन स्वीकरवाम, स्वीयाभ्यास-निर्माणस्य एका रोमांचक-यात्रा अर्थात् - NCC | अस्याः यात्रायाः विषये, आगच्छन्तु, किञ्चित्-समधिक-सम्वाद-हेतोः अद्य दूरभाष-द्वारा कैश्चित् नवयुवकैः साकं सम्भाषणं करवाम, ये हि NCC-इत्यत्र अपि स्वीयम् अभिज्ञानं प्रतिष्ठापितवन्तः | आगच्छन्तु, तैः सम्भाषणं करवाम |

प्रधानमंत्री : सखायः! भवन्तः सर्वे कथं सन्ति ?

तरन्नुम-खानः : जयतु हिन्दः, प्रधानमन्त्रि-महोदय!

प्रधानमंत्री : जयतु हिन्दः

तरन्नुम-खानः :महोदय! मम नाम कनिष्ठाधिकारिणी तरन्नुम-खानः

प्रधानमंत्री : तरन्नुम! भवती कुत्रत्या?

तरन्नुम-खानः : अहं दिल्ली-वास्तव्यास्मि महोदय!

प्रधानमंत्री : सुष्ठु | तर्हि NCC-इत्यत्र कति वर्षाणि यापितानि, कीदृशाः अनुभवाः आसन् भवत्याः ?

तरन्नुम-खानः : महोदय! अहं NCC-इत्यत्र सप्तदशोत्तर-विंशति-शत-तमे वर्षे प्राविशम्, तथा च एतानि त्रीणि वर्षाणि मम जीवनस्य उत्कृष्टानि वर्षाणि अभवन् |

प्रधानमंत्री : भद्रम्, इदं श्रुत्वा शोभनम् अन्वभवम् |

तरन्नुम-खानः : महोदय!, भवते निवेदयितुम् अभिलषामि यत् मम उत्कृष्टः अनुभवः 'एक-भारतम् - श्रेष्ठभारतम्'-शिविरे अभवत् | अस्मदीयम् इदं शिविरं ओगस्ट-मासे आसीत् यस्मिन् NER- 'North Eastern Region'उत्तर-पूर्वीय-क्षेत्रस्य बालाः अपि आगच्छन्| तैः शिशिक्षुभिः साकं वयं दश-दिनानि यावत् न्यवसन् | वयं तेषां वासाचरण-विषयम् अवगतवन्तः | वयं दृष्टवन्तः यत् तेषां व्यवहार-भाषा कीदृशी अस्ति? | तेषां परम्परा-संस्कृति-सम्बद्धानि अनेक-विधानि वस्तूनि वयं शिक्षितवन्तः | यथा vaizome अर्थात् हरिःॐ! हेलो...स्वागतम् | तथैव अस्माकं सांस्कृतिक-रात्रिः अपि आयोजितासीत्, तस्मिन्नवसरे ते अस्मान् नृत्यं शिक्षितवन्तः, तेहरा - अर्थात् तेषां नृत्यम् | तथा च, ते अस्मान् 'मेखला'(mekhela) इति परिधानं धारयितुम् अपि शिक्षितवन्तः | सत्यं वदामि, तत्-परिधानेन वयं सर्वे दिल्ली-वास्तव्याः अतितरां शोभामहे स्म तथैव अस्माकं नागालैंड-सखायः अपि | वयं तान् 'दिल्ली-दर्शना'र्थम् अपि नीतवन्तः, यत्र वयं तान् राष्ट्रिय-युद्ध-स्मारकं India-Gate-इति भारत-द्वारं च दर्शितवन्तः | तत्र वयं तान् दिल्ल्याः चाट-इति लेह्य-व्यञ्जनम् अपि

अभक्षयन्, भेल-पूरी-इति उपस्कर-शष्कुलीम् अपि अभोजयन्, तैः किञ्चित् तिक्तम् अनुभूतम्, यथा ते अस्मान् ज्ञापितवन्तः यत्तेभ्यः अधिकतरं सूप-पानं रोचते, ते ईषत् क्वाथितान् शाकादीन् अश्नन्ति, तर्हि तेभ्यः भोजनं तु तादृक् रुचिकरं नैव अजायत, किन्तु एतदतिरिच्य वयं तैः सम्भूय अनेकानि छायाचित्राणि स्वीकृतवन्तः, स्वीयान् अनेक-विधानुभवान् तैः सम्विभाजितवन्तः |

प्रधानमंत्री : किं भवन्तः तैः साकं धृत-सम्पर्काः?

तरन्नुम-खानः : एवं महोदय, वयं साम्प्रतमपि तैः साकं धृत-सम्पर्काः स्मः |

प्रधानमंत्री : भवतु, सम्यक् कृतं भवद्भिः |

तरन्नुम-खानः : एवं महोदय!

प्रधानमंत्री : अपरे के के सखायः सन्ति भवत्या साकम्?

श्रीहरिः जी.वी. : जयतु हिन्दः, महोदय!

प्रधानमंत्री : जयतु हिन्दः |

श्रीहरिः जी.वी. : अहं वरिष्ठः अधिकारी Sri Hari G.V. वदामि | अहं कर्णाटके बेंगलूरू-वास्तव्योऽस्मि|

प्रधानमंत्री : एवम्, भवान् कुत्र पठति ?

श्रीहरिः जी.वी. : महोदय! बेंगलूरू-नगरे कृस्तु-जयन्तीमहाविद्यालये|

प्रधानमंत्री : सुष्ठु, बेंगलूरू-नगरे एव!

श्रीहरिः जी.वी. : एवम्, महोदय!

प्रधानमंत्री : कथयतु

श्रीहरिः जी.वी. : महोदय! वयं गतदिने एव सिङ्गापुरे आयोजितात्
Youth-Exchange-Programme- युव-विनिमय-
कार्यक्रमात् प्रत्यागताः स्मः |

प्रधानमंत्री : अहो! शोभनम्!

श्रीहरिः जी.वी. : एवम्, महोदय!

प्रधानमंत्री : तर्हि किमु भवान् तत्र गमनस्य अवसरं लब्धवान्?

श्रीहरिः जी.वी. : एवम्, महोदय!

प्रधानमंत्री : सिंगापुरे कीदृशः अनुभवः अजायत?

श्रीहरिः जी.वी. : तत्र षड्भिः देशैः सहभागित्वं निर्व्यूढम् - तेषु
ब्रिटेन-अमेरिका-सिङ्गापुर-ब्रूनई-होङ्गकोङ्ग-नेपाल-
देशाः अन्यतमाः| अत्र वयं युद्ध-पाठानाम् अन्ताराष्ट्रिय-सैन्याभ्यासानां
विनिमयं शिक्षितवन्तः |अत्र अस्मदीयं प्रदर्शनं किञ्चित् एव पृथक्
आसीत्,
महोदय! एतेषु अस्मान् जल-क्रीडाः पराक्रम-कार्याणि च शिक्षितानि, तथा
च,
जल-polo-स्पर्धायां भारतीयं वृन्दं विजयि अभवत्, महोदय! अपि च,
सांस्कृतिक-कार्यक्रमेषु वयं समग्रतया उत्कृष्ट-प्रदर्शकाः आस्मः महोदय!
अस्माकं व्यायामाभ्यासः आदेश-शब्द-क्रीडा च तेभ्यः अतितरां रुचिकराः
प्रतीताः |

प्रधानमंत्री : भवन्तः कति जनाः आसन् हरे?

श्रीहरिः जी.वी. : विंशतिः महोदय!| वयं दश बालाः दश च बालिकाः आसन् महोदय!

प्रधानमंत्री : एवं हि, सर्वे भारतस्य पृथक्-पृथक् राज्येभ्यः आसन् किमु?

श्रीहरिः जी.वी. : एवम्, महोदय! |

प्रधानमंत्री : भवतु, भवतः सर्वे सखायः भवदनुभव-श्रवणार्थं
अतितराम् आतुराः भवेयुः, परञ्च मह्यं इदम् अरोचत | अपरे के
सन्ति भवता साकम्?

विनोले किसो : जयतु हिन्दः, महोदय!

प्रधानमंत्री : जयतु हिन्दः

विनोले किसो : मम नाम - वरिष्ठा अधिकारिणी विनोले-किसो |
अहं उत्तर-पूर्वीय-क्षेत्रीयस्य Nagaland-राज्यस्य
वास्तव्याऽस्मि, महोदय!

प्रधानमंत्री : अस्तु, विनोले! कथयतु, कीदृशः अनुभवः अस्ति भवत्याः ?

विनोले किसो : महोदय, अहं Jakhama-इत्यत्र स्वायत्ते St. Joseph's-
महाविद्यालये अध्येमि, - B.A. History (Honours) - इति |
महोदय! अहं NCC-इत्यत्र सप्तदशोत्तर-विंशति-शत-
तमे वर्षे प्राविशम्, तथा चायं मम जीवनस्य उत्कृष्टः निर्णयः
आसीत्, महोदय!

प्रधानमंत्री : NCC-कारणात् हिन्दुस्थाने कुत्र-कुत्र गमनस्य अवसरः लब्ध?

विनोले किसो : महोदय! अहं NCC-संघटने प्राविशम्, सुबहु शिक्षितुम् अपारयम्
तथा च, मया अवसराः अपि अनेके लब्धाः आसन् | मम अन्यतमम्
अनुभवं भवते निवेदयितुं वाञ्छामि | अहम् ऐषमः [2019] जून-मासे शिविरे एकस्मिन्
सहभागित्वं निरवहम्, तदस्ति - संयुक्त-वार्षिक-प्रशिक्षण-शिविरम् - तच्च Kohima-नगर्यां
Sazolie-महाविद्यालये आयोजितमासीत् | शिविरेऽस्मिन् चतुश्शतं प्रशिशिक्षवः सहभागित्वं
निरवहत् |

प्रधानमंत्री : तर्हि नागालैण्डे भवतः सर्वे सखायः ज्ञातुम् अभिलषन्तः स्युः यत्
हिन्दुस्थाने कुर-कुत्र गतम्, किं किं दृष्टम्? किमु सर्वान् स्वीयानुभवान् श्रावयति वा?

विनोले किसो : एवं महोदय!

प्रधानमंत्री : अपरे के सन्ति भवत्या साकम्?

अखिलः : जयतु हिन्दः, महोदय! मम नाम कनिष्ठाधिकारी अखिलः|

प्रधानमंत्री : अस्तु, अखिल! कथयतु |

अखिलः : अहं हरियाणा-राज्ये रोहतक-वास्तव्योऽस्मि, महोदय !

प्रधानमंत्री : एवम्...

अखिलः : अहं दिल्ली-विश्व-विद्यालयस्स्य दयाल-सिंह-महाविद्यालयात्
Physics Honours-इति अध्येमि |

प्रधानमंत्री : एवम्... एवम् ...

अखिलः : महोदय! NCC-इत्यत्र मह्यं सर्वाधिकं यद् अरोचत तदस्ति-
अनुशासनम् |

प्रधानमंत्री : शोभनम् ...

अखिलः : एतद्धि माम् अधिकतरम् उत्तरदायित्व-पूर्णं नागरिकं व्यदधात्,
महोदय! NCC-cadet- इत्यस्य व्यायामः, गणवेषः च माम्
अतितरां रोचते |

प्रधानमंत्री : कति-शिविरेषु सहभागित्वं निर्व्यूढम्? कुत्र-कुत्र गमनस्य अवसरः
लब्धः?

अखिलः : महोदय! त्रिषु शिविरेषु अहं सहभागित्वं निर्व्यूढवान् | नातिचिरं

Dehraduने भारतीय-सैन्य-Academy-इत्यत्र संलग्न-शिविरस्य अङ्गत्वेन आसम् |

प्रधानमंत्री : कियत्कालिकम् एतद् आसीत् ?

अखिलः : महोदय! त्रयोदश-दिनात्मकं शिविरम् आसीत् एतत् |

प्रधानमंत्री : सुष्ठु

अखिल : महोदय! तत्राहं भारतीय-सेनाषु अधिकारिणः केन प्रकारेण भवन्ति- तद्धि अहं अतिनिकटतया अपश्यम्, ततः परं भारतीय-सेनासु अधिकारित्वेन वर्तितुं मम संकल्पः दृढतरः सञ्जातः|

प्रधानमंत्री : साधु...

अखिलः : तथा च, महोदय! अहं गणतन्त्र-दिवसीये सामूहिक-प्रयाणे अपि सहभागित्वं निर्व्यूढवान्, तच्च मह्यं मम कुटुम्बाय च भूयान् गौरव-विषयः आसीत् |

प्रधानमंत्री : साधु! साधु!! ...

अखिलः : ममापेक्षया मम जननी अतितरां प्रसन्ना आसीत्, महोदय! वयं प्रातः द्विवादने उत्त्थाय राजपथोपरि अभ्यासार्थं गच्छन्तः स्मः, तदा वयं तादृगुत्साह-युताः अभवाम, यत् तत्तु दर्शनीयमेव आसीत् | अपरे सैन्य-गुल्माः सामूहिक-प्रयाणावसरे अस्मान् एतावत् प्रोत्साहयन्ति स्मः राजपथोपरि यत् वयं रोमाञ्चं अनुभवन्तः स्मः, महोदय!

प्रधानमंत्री : अस्तु, भवद्भिः चतुर्भिः सम्भाषणस्य अवसरः लब्धः, सोऽपि NCC-दिवसावसरे | सुतरां प्रसन्नताम् अनुभवामि यतो हि ममापि सौभाग्यमासीत् यत् अहमपि शैशवावसरे मम ग्रामस्य विद्यालये NCC Cadet-रूपेण शिशिक्षुः आसम् | अत एवाहं जानामि यत् अनुशासनं गणवेषः च भवतः, अनयोः कारणात् विश्वास-स्तरः विवर्धते, एतानि सर्वाणि तथ्यानि बाल्यकाले मया NCC Cadet-रूपेण अनुभवितुम् अवसरः लब्धः |

विनोले : प्रधानमन्त्रि-महोदय! प्रश्नमेकं प्रष्टुं वाञ्छामि |

प्रधानमंत्री : नूनम्,नूनम्, कथयतु...

तरन्नुम-खानः : किं भवान् अपि NCC-अङ्गत्वेन आसीत् वा ?

प्रधानमंत्री : का? विनोले वदति किम्?

विनोले : एवं महोदय! एवं महोदय!

प्रधानमंत्री : एवम्, विनोले! कथयतु...

विनोले : किं भवान् कदाचित् दण्डितः आसीत् वा?

प्रधानमंत्री : (हसित्वा) अर्थात् भवद्भ्यः दण्डः प्रदीयते?

विनोले : एवं महोदय!

प्रधानमंत्री : नैव नैव, मयि कदापि नैवं सञ्जातम्, यतो हि अहं वस्तुतः अनुशासन-प्रियः आसम्, परञ्च एकदा काचित् भ्रान्तिः सञ्जाता आसीत् |यदा वयं शिविरे आस्मः तदाहं वृक्षारोहणं कृतवान् | तदा प्रथमं तु एवं प्रतीयते स्म यत् मया कस्यचित् विधेः उल्लङ्घनं कृतम् परञ्च सर्वैः अवगतं यत् तत्र पत्रकस्य सूत्रेण आवृतः पक्षी अवस्रंसितः आसीत् | अतः तं रक्षितुम् अहं वृक्षारोहणं अकरवम् |अस्तु, पूर्वं तु प्रतीयते स्म यत् मयि अनुशासनात्मकं कार्यं भविष्यति परञ्च पश्चात् मह्यं सुबहूनि प्रशंसा-वचान्सि उद्गीर्णानि |एवंप्रकारेण कश्चन पृथगेव अनुभवः अधिगतः मया |

तरन्नुम-खानः : ओम्, महोदय! एतत् ज्ञात्वा भूयसी प्रसन्नता अनुभूयते |

प्रधानमंत्री : धन्यवादः.

तरन्नुम-खानः : अहं तरन्नुमः सम्भाषे |

प्रधानमंत्री : एवम्,एवम्, तरन्नुम! कथयतु...

तरन्नुम-खानः : यदि भवतः अनुज्ञा भवेत् चेत् प्रश्नमेकं भवन्तं प्रष्टुं वाञ्छामि |

प्रधानमंत्री : नूनम्... नूनम् ... कथयतु |

तरन्नुम-खानः : महोदय! भवतः सन्देशेषु अस्मान् भवान् अकथयत् यत् प्रत्येकमपि भारतीय-नागरिकः वर्ष-त्रये पञ्चदश-स्थानानां यात्राम् अवश्यं कुर्यात् |कृपया भवान् कथयतु यत् अस्माभिः कुत्र गन्तव्यम्? तथा च, कुत्र गत्वा भवान् सर्वाधिकम् आनन्दम् अन्वभवत्?

प्रधानमंत्री : अञ्जसा अहन्तु सर्वदा हिमालयं सर्वाधिकं समीहे |

तरन्नुम-खानः : ॐ...

प्रधानमंत्री : परञ्च तथापि अहं भारतीयान् साग्रहं वदामि यत् यदि भवन्तः प्रकृति-प्रेमाणं सन्धारयन्ति चेत् |

तरन्नुम-खानः : ॐ ...

प्रधानमंत्री : गहनारण्यानि, स्रोतान्सि, एवंप्रकारकं च परिवेशं द्रष्टुं वाञ्छन्ति चेत् सर्वान् भवतः वदामि यत् नूनं उत्तर-भारतं गच्छेयुः |

तरन्नुम-खानः : एवं महोदय!

प्रधानमंत्री : इदमहं सर्वदैव सूचयामि, तथा च एतस्मादेव कारणात् उत्तर-पूर्व-क्षेत्रे पर्यटनमपि अतितरां वर्धिता, अर्थव्यवस्थायै अपि भूयः लाभः भविष्यति, तथा च 'एक-भारतम् -श्रेष्ठ-भारतम्' -इति स्वप्नमपि दृढतरं भविता |

तरन्नुम-खानः : ॐ महोदय!

प्रधानमंत्री : किन्तु हिन्दुस्थाने प्रत्येकमपि स्थाने सुबहु अवलोकनीयं वर्तते, अध्येतव्यं चास्ति, तथा च अनन्यप्रकारेण आत्मसात्-करणीयम् अस्ति |

श्रीहरिः जी.वी. : प्रधानमन्त्रि-महोदय! अहं श्रीहरिः वदामि |

प्रधानमंत्री : एवम्, हरे! कथयतु ...

श्रीहरिः जी.वी. : अहं भवतः एतत् ज्ञातुं वाञ्छामि यत् भवान् राजनीतिज्ञः नैव अभविष्यत् चेत् तर्हि किम् अभविष्यत् ?

प्रधानमंत्री : अयन्तु दुष्करः प्रश्नः यतो हि प्रत्येकमपि बालस्य जीवने अनेके क्रमान्शाः आयान्ति | कदाचित् एतादृक् भवितुम् अभिलष्यते, तर्हि, कदाचित् तादृक् भवितुम् अभिलष्यते, परञ्च तथ्यमिदं सत्यं यत् नाहं कदाचिदपि राजनीतौ प्रवेष्टुं आभिलषम्, न वा कदाचिदपि विचारितवान् परञ्च अत्र प्राप्तोऽस्मि, अतः सर्वार्पणेन देशस्य कार्यार्थं भूयाम्, एतदर्थमेव सदा चिन्तयामि, अतः अत्राहं नैवाभविष्यम् चेत् कुत्राभविष्यम् इति नैव चिन्तनीयं मया | साम्प्रतन्तु यत्रास्मि तत्रैव सर्वार्पणेन जीवितुं प्रयतनीयम्, कटिबद्धतया च देशहितार्थं कार्याणि करणीयानि सन्ति | न दिनं चिन्तनीयम्, न वा रात्रिः विचारणीया, केवलं तदेव अनन्यतमं लक्ष्यं मनसि निध्याय समर्पितोऽस्मि |

अखिलः : प्रधानमन्त्रिमहोदय!...

प्रधानमंत्री : एवम्...

अखिलः : भवान् अहर्निशं तावान् कार्यव्यापृतः, अत्रास्ति मम जिज्ञासा यत् किं भवान् दृश्यवाहिन्याः चलचित्राणाम् अवलोकनस्य पुस्तकानां च पठनस्य अवसरः लभ्यते वा?

प्रधानमंत्री : पुस्तकाध्ययनस्य मम रुचिः सदैव प्रवर्तते स्म | चलचित्राणाम् अवलोकनस्य नैतादृशी कदाचित् रुचिः आसीत्, तत्र नियतावधिः

नास्ति, तथा च, न तथाविधिना दृश्य-वाहिनीमपि अवलोकयितुं शक्नोमि | अतितरां न्यूनम् | कदाचित्तु पूर्वं discovery channel-इति वाहिनीं पश्यन् आसम्, जिज्ञासावशात् | पुस्तकानि पठन् आसम् किन्तु एतेषु दिनेषु तु पठितुमपि नैव शक्नोमि तथा च, अपरतः Google-कारणात् अपि अस्माकं दुरभ्यासः जातः यतो हि यदि कश्चन सन्दर्भः अवलोकनीयः अस्ति चेत् सत्वरमेव वयं तद्विषयकं लघुमार्गम् अन्वेषयामः | एवं हि सर्वेषामपि दुरभ्यासः जातः, ममापि दुरभ्यासः | अस्तु मित्राणि, एतत्तु मह्यम् अतितराम् अरोचत भवद्भिः साकं संभाषणेन तथाच, अहं भवतां माध्यमेन NCC-इत्यस्य सर्वेभ्यः अपि शिशिक्षुभ्यः भूयस्यः शुभकामनाः व्याहरामि | भूयो भूयः धन्यवादाः मित्राणि !

सर्वे NCC cadets : बहुशः धन्यवादाः महोदय!

प्रधानमंत्री : धन्यवादाः, धन्यवादाः

सर्वे NCC cadets : जयतु हिन्दुस्थानम् |

प्रधानमंत्री : जयतु हिन्दस्थानम्

सर्वे NCC cadets : जयतु हिन्दः प्रधानमन्त्रि-महोदय!

प्रधानमंत्री : जयतु हिन्दः जयतु हिन्दः |

मम प्रियाः देशवासिनः, अस्माभिः सर्वैरपि देशवासिभिः नेदं कदाचिदपि नैव विस्मरणीयं डिसेम्बर-मासे सप्तमे दिनाङ्के सशस्त्र-सेनानां ध्वज-दिवसः आमान्यते |अयं सः एव दिवसः यदा वयं स्वीयान् वीर-सैनिकान्, तेषां पराक्रमम्, तेषाञ्च बलिदानं सुस्मरामः एव, परञ्च योगदानमपि कुर्मः | केवलं सम्मान-भावेन कार्यं नैव सेत्स्यति | सहभागित्वमपि आवश्यकं भवति| डिसेम्बर-मासे सप्तमे दिनाङ्के प्रत्येकमपि नागरिकः अग्रेसरेत् | प्रत्येकमपि तद्दिने सशस्त्र-सेनानां ध्वजं संधारयेत्, तथा च प्रत्येकमपि जनस्य योगदानमपि स्यात् |आगच्छन्तु, अवसरेऽस्मिन् वयं स्वीयानां सशस्त्र-सेनानां अदम्यसाहस-शौर्य-समर्पणभावान् प्रति कृतज्ञतां प्रकटयेम, तथा च, वीरसैनिकान् च सुस्मरेम |

मम प्रियाः देशवासिनः, भारते 'फ़िट् इण्डिया मूवमेण्ट' इत्यनेन सुस्वस्थ-भारताभियानेन भवन्तः परिचिताः एव स्युः। केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड इत्यनेन एकः वर्धापनयोग्यः उपक्रमः आरब्धः। फ़िट्-इण्डिया-इति सुस्वस्थ-भारताभियानाय सप्ताहस्य आयोजनम् इति। विद्यालयाः फ़िट्-इण्डिया-सप्ताहं डिसम्बरमासे स्वेच्छया आचरितुं शक्नुवन्ति। अस्मिन् हि सुस्वास्थ्य-सम्बद्धानि नैकानि आयोजनानि करणीयानि। अस्मिन् हि प्रश्न-मञ्च-

निबन्ध-लेख-चित्रकला-पारम्परिक-क्रीडा-स्थानीयक्रीडा-योगासन-नृत्य-खेल-प्रभृतयः प्रतियोगिताः समन्विताः सन्ति। फ़िट्-इण्डिया-सप्ताहे विद्यार्थिभिः सह तेषां शिक्षकाः, अभिभावकाः चापि सहभागं स्वीकर्तुं शक्नुवन्ति। परम्, न इदं विस्मरणीयं यत् सुस्वस्थ-भारतम् इत्यस्य अभियानस्य अभिप्रायः केवलं मस्तिष्क-व्यायामेन सङ्गणक-कार्येण अथ वा दूरभाषेसु व्यायामसम्बद्धानां चरिष्णुतन्त्राणाम्(Apps) अवलोकनेन न। मैवम्। स्वेदः निःस्सारणीयः। भोजनरुचिः परिवर्तनीया। अधिकाधिकान् क्रियाकलापान् कर्तुम् अभ्यसनीयम्। अहं देशस्य सर्वराज्यानां विद्यालय-सञ्चालकेभ्यः समितिभ्यः प्रबन्धकेभ्यः अभ्यर्थयामि यत् प्रत्येकस्मिन् विद्यालये डिसेम्बरमासे स्वस्थ-भारत-सप्ताहस्य आयोजनं भवेत्। अनेन सुस्वास्थ्याचरणम् अस्माकं दिनचर्यायां योजितं भविष्यति। सुस्वस्थ-भारताभियाने सुस्वास्थ्याय विद्यालयानां कृते श्रेणीव्यवस्था अपि कृता। एताः श्रेणीः स्वीकृत्य सर्वविद्यालयाः सुस्वस्थ-भारताभियानस्य उद्देश्य-चिह्नम्, अथ च ध्वजस्य प्रयोगं कर्तुं प्रभविष्यन्ति। सुस्वस्थ-भारताभियानस्य जालपुटे विद्यालयाः आत्मानं सुस्वस्थमिति घोषयितुं शक्नुवन्ति। त्रितारकयुतं सुस्वस्थभारतम्, पञ्चतारकयुतं सुस्वस्थभारतम् इति श्रेण्यौ अपि प्रदास्येते। अहम् अनुरुन्धे यत् सर्वविद्यालयाः सुस्वस्थ-भारतश्रेण्यां सहभागितां कुर्युः, एतत् सुस्वस्थ-भारताभियानं च सहज-स्वभावं भवतु। एकं जनान्दोलनं भवतु। जागरुकतायुतं भवतु। एतदर्थं प्रयासाः करणीयाः।

मम प्रियाः देशवासिनः, अस्माकं देशः विशालः। विविधतापूर्णः अस्ति। एतावत् प्राचीनम् अस्ति यस्य विविधविषयाः अस्माभिः न स्मर्यन्ते, स्वाभाविकञ्च अस्ति। भवतु एकं विषयं भवतां कृते वक्तुम् इच्छामि। कतिपयदिनानि पूर्वं MY Gov इत्यस्मिन् एकस्याः टिप्पण्याः उपरि मम दृष्टिः गता। एषा च टिप्पणी असमराज्यस्य नौगांव-स्थानात् रमेशशर्म-महोदयेन लिखिता आसीत्। तेन लिखितम् आसीत् - ब्रह्मपुत्र-नदस्य तीरे एकः उत्सवः चलन् अस्ति यस्य नाम अस्ति ब्रह्मपुत्र-पुष्कर इति। नवम्बरमासस्य चतुर्थ-तः षोडश-दिनाङ्क-पर्यन्तं एषः उत्सवः प्राचलत् यस्मिन् देशस्य विभिन्न-भागेभ्यः जनाः आगताः। एतत् श्रुत्वा भवान् अपि आश्चर्यचकितः स्यात्। सत्यम् एतादृशं एव वृत्तम्, एषः प्रमुखः महत्वपूर्णः उत्सवः। अस्माकं पूर्वजैः एतादृशः अयं उत्सवः संरचितः तं श्रुत्वा भवान् अपि आश्चर्यान्वितः भविष्यति। परं दुःखं, यावत् अस्य प्रचारः प्रसारः चापेक्षितः, देशस्य प्रतिकोणं यथा अस्य उत्सवस्य विषये सूचना अपेक्षिता, तावती नास्ति। अथ च एतत् अपि सत्यं, एतत् आयोजनम् एकः देशः, एकः सन्देशः, वयं च समवेताः इति भावप्रदायकः ऊर्जादायकः चास्ति।

सर्वप्रथमं तु रमेशमहोदय! भवते बहुशः धन्यवादाः यत् भवान् मनोगतम् इत्यस्य माध्यमेन देशवासिषु एनं विषयं आनीतवान्। भवान् स्वपीडाम् उपस्थापितवान् यत् एतादृश-महत्त्वपूर्ण-विषये नास्ति व्यापकचर्चा, नैवास्ति प्रचारः। भवतः पीडाम् अहं अवगन्तुं शक्नोमि। देशस्य अधिकाः जनाः अस्मिन् विषये न जानन्ति। यदि कश्चन एनम् उत्सवम् इण्टरनेशनल्-

रीवर-फेस्टिवल- इति नाम्ना अकथयिष्यत्, तर्हि अस्य स्वयमेव प्रचारः अभविष्यत्। चर्चा अभविष्यत्।

मम प्रियाः देशवासिनः, पुष्करम्, पुष्करालू, पुष्करः - किं एते शब्दाः पूर्वं श्रुताः? किं भवन्तः जानन्ति, किमेतत् अहं विज्ञापयामि। देशे द्वादश-स्थानेषु विभिन्नासु नदीषु ये उत्सवाः भवन्ति तेषां विभिन्नानि एतानि नामानि। प्रतिवर्षं एकस्याः नद्याः क्रमः इत्युक्ते अग्रिमक्रमः द्वादश-वर्षाणि अनन्तरं आयास्यति। अयं च उत्सवः देशस्य विभिन्न-कोणेषु स्थितासु द्वादश-नदीषु भवति। क्रमशः भवति द्वादश-दिनानि यावत् च भवति। कुम्भ-सदृशः अयम् उत्सवः अपि राष्ट्रियाम् एकतां सम्वर्धयति, एकभारतम् - श्रेष्ठभारतम् इत्यस्य च प्रदर्शनं कारयति। पुष्करम् एतादृशः उत्सवः अस्ति यस्मिन् नदी-माहात्म्यं, नद्याः गौरवः, जीवने नद्याः महत्ता सहजतया प्रकटिता भवति।

अस्माकं पूर्वजैः प्रकृति-पर्यावरण-जल-भूमि-वनेभ्यः च अतीव-महत्ता प्रकटिता। ते नदीनां महत्तां जानन्ति स्मः। कथं समाजे अपि नदीभ्यः सकारात्मक-भावः उत्पद्येत, कथं संस्कारः उत्पद्येत, नदीभिः सह संस्कृतिः संस्कारः च कथं भवेत्, नद्यः समाजसम्बद्धाः कथं भवेयुः तदर्थं प्रयासाः कृताः। आह्लादविषयः तु एषः यत् समाजः नदीभिः सह तु सम्बद्धः परं परस्परमपि सम्पृक्तः अभवत्।

विगतवर्षे तमिलनाडु-राज्यस्य तामीर-बरनी-नद्यां 'पुष्करम्' इत्युत्सवः आयोजितः । अस्मिन् वर्षे एषः उत्सवः ब्रह्मपुत्रनदे आयोजितः, आगामिनि वर्षे तु तुङ्गभद्रा-नद्यां आन्ध्रप्रदेशे तेलंगानाराज्ये कर्णाटके च आयोजयिष्यते। एकेन प्रकारेण एतेषां द्वादश-स्थलानां यात्रा पर्यटन-चक्ररूपेण अपि भवन्तः कर्तुं शक्नुवन्ति। अत्राहं असमराज्यीयानां कृते वर्धापनानि प्रकटयामि यैः समग्रदेशात् समागतानां तीर्थयात्रिणां अतिसुन्दरः सत्कारः कृतः। आयोजकैः स्वच्छता-विषये अपि अवधानं स्थापितम्। प्लास्टिक-फ़्री-ज़ोन इत्युक्ते अविघट्ट-पदार्थ-रहितस्थानानि सुनिश्चितानि। यथास्थलं बायो-शौचालयाः अपि निर्मिताः। मम आशा अस्ति यत् नदीभ्यः भावनिर्माणस्य अयं सहस्रवर्षप्राचीनः उत्सवः आगामिसन्ततयः अपि आयोजयेयुः। प्रकृतिः पर्यावरणं जलञ्च एतानि सर्वाणि अस्माकं पर्यटनस्य अङ्गानि भवेयुः, जीवनस्य चापि।

मम प्रिय देशवासिनः, नमो इति चरिष्णु-तन्त्रे मध्यप्रदेशतः पुत्री श्वेता लिखति। महोदय! अहं नवम-कक्ष्यायाम् अस्मि। मम बोर्ड-इत्यस्य परीक्षायाम् एकं वर्षम् अवशिष्टम् परं छात्राभिः Exam warriors इति परीक्षा-दातृभिः सह भवतां वार्तालापं शृणोमि। अहं भवन्तं एतदर्थं लिखितवती यतोहि एतावता भवता न संसूचितं यत् अग्रिमपरीक्षायै चर्चा कदा भविष्यति। कृपया अस्मिन् शीघ्रातिशीघ्रम् अवधानं करोतु। यदि सम्भवं तर्हि जान्युआरि-मासे एव अस्य आयोजनं

भवतु। मित्राणि, मनोगतमित्यस्य कार्यक्रमस्य उत्तमः विषयः एषः – यत् अनेन मम युवमित्राणि, मह्यं स्नेहाधिकारपुरस्सरं निवेदनानि आदेशान् वा सूचयन्ति। एतत् दृष्ट्वा अतिप्रसन्नताम् अनुभवामि। श्वेता-महोदये, अयं विषयः भवत्या उचितसमये उत्थापितः। परीक्षाकालः समागच्छति अतः प्रतिवर्षमिव अस्माभिः परीक्षाविषयिकी चर्चा अपि करणीया। भवत्याः कथनं समीचीनं अस्य कार्क्रमस्य आयोजनं किञ्चित् पूर्वं करणीयम्।

विगतकार्यक्रमानन्तरं नैकैः जनैः कार्यक्रमं प्रभावपूर्णं कर्तुं स्वाभिप्रायाः प्रेषिताः। अभियोगाः अपि, यतोहि विगते काले एषः कार्यक्रमः विलम्बेन आयोजितः आसीत्। परीक्षाः अपि तदा आगतप्रायाः आसन्। श्वेतायाः परामर्शः अपि समुचितः यत् मया एषः कार्यक्रमः जान्युआरि-मासे करणीयः। मानवसंसाधनविकासमन्त्रालयः My Gov इत्यस्य वृन्दं च एतदर्थं कार्यं कुरुतः। परमहं प्रयत्नं करिष्यामि यत् ऐषमः परीक्षाविषयिणी चर्चा जान्युआरि-मास्सय आरम्भे मध्ये वा भवेत्। सम्पूर्णदेशस्य विद्यार्थिनां मित्राणां च पार्श्वे प्रकल्पद्वयम् अस्ति। एकं तु स्वविद्यालयात् एव अस्मिन् कार्यक्रमे सहभागिता, द्वितीयः दिल्ल्याम् आयोजितकार्यक्रमे सहभागिता। दिल्लीकार्यक्रमार्थं विद्यार्थिचयनं My Gov इति अन्तर्जालमाध्यमेन करिष्यते। मित्राणि, अस्माभिः मिलित्वा परीक्षाभयः अपसारणीयः। मम युवमित्राणि परीक्षासमये प्रसन्नमुखाः भवेयुः, अभिभावकाः चिन्तामुक्ताः भवेयुः, शिक्षकाः च आश्वस्ताः भवेयुः। एतद् उद्देश्यं स्वीकृत्य बहुवर्षेभ्यः वयं मनोगतम् इत्यनेन परीक्षाविषयिणीं चर्चां टाऊन-हॉल्-माध्यमेन कृतवन्तः अथवा exam warriors इति पुस्तकमाध्यमेन प्रयासरताः स्मः। एतस्मै लक्ष्याय देशस्य विद्यार्थभिः तेषाम् अभिभावकैः शिक्षकैः च गतिः प्रदत्ता एतदर्थं सर्वेषां कृते कार्तज्ञ्यं प्रकटयामि अथ च आगामि-परीक्षा-चर्चाकार्यक्रमं वयं मिलित्वा आचरेम – आगम्यताम् भवन्तः सर्वे निमन्त्रिताः ।

मित्राणि! विगते मनोगते अस्माभिः अयोध्यावादे आगतस्य इलाहाबाद-उच्चन्यायालयस्य निर्णय-विषये चर्चा कृता आसीत्। तदा च मया कथितमासीत् यत् कथं देशवासिभिः शान्तिः भ्रातृभावश्च संधारितः आसीत्। निर्णयात्प्राक् अनन्तरं चापि। एतत्वारमपि नवम्बरस्य नवमे दिनाङ्के यदा सर्वोच्च-न्यायालयस्य निर्णयः आगतः, तदा एकशतोत्तरत्रिंशत्-कोटिभिः भारतीयैः प्रमाणितं यत्तेषां कृते राष्ट्रहितं अतिरिच्य किमपि वरीयः नास्ति। देशे शान्तिः, ऐक्य-सद्भावानां च मूल्यं सर्वोपरि अस्ति। राममन्दिर-विषये यदा निर्णयः आगतः तदा अखिलराष्ट्रेण तस्य

सहृदयं आलिंगनं कृतं। पूर्णतया सहजतया शान्त्या च तस्य स्वीकारः कृतः। अद्य मनोगतस्य माध्यमेन अहं देशवासिभ्यः साधुवादं प्रेषयामि, धन्यवादं च कथयामि । तैः यावत् धैर्य-संयम-परिपक्वता-पूर्णः व्यवहारः कृतः तस्य कृते विशेषं आभारं प्रकाशयितुं इच्छामि। अनेन एकतः तु सुदीर्घः वैधिकः संघर्षः समाप्तः अपरतश्च न्यायपालिकां प्रति देशस्य सम्मानं श्रद्धा च अभिवर्धिते स्तः। वस्तुतः एषः निर्णयः अस्माकं न्यायपालिकायै अपि निर्णायकः बिन्दुः अस्ति। सर्वोच्च न्यायालयस्य ऐतिहासिक-निर्णयानन्तरं देशः नूतनाभिः आशाभिः आकांक्षाभिश्च साकं नव्ये मार्गे नूतनेन च संकल्पेन अग्रेसरति। न्यू इंडिया एषां भावनां स्वीकार्य शान्त्या सद्भावेन च अग्रेसरतु - एषा मम कामना, अस्माकं सर्वेषां च अभिलाषः अस्ति।

मम प्रियाः देशवासिनः, अस्माकं सभ्यता, संस्कृतिः भाषाश्च अखिल-विश्वं अनेकतायां ऐक्यस्य सन्देशं प्रसारयन्ति। त्रिंशत्-उत्तरैक-शत-कोटि-मितानां भारतीयानां एषः देशः, यस्य विषये कथ्यते स्म "कोस-कोस पर पानी बदले और चार कोस पर वाणी" इति। एतस्यां अस्माकं भारतभूमौ शतशः भाषाः शताब्दिभिः पुष्पिताः पल्लविताश्च अवर्तन्त। यद्यपि वयं एतासां भाषाणां उपभाषाणां च क्षरण-विषयेऽपि चिन्तिताः भवामः। विगत-दिनेषु अहं उत्तराखण्डस्य धारचुला-क्षेत्रस्य एकां कथां अपठम् । तया कथयाऽहं अतीव आशान्वितः जातः। एतया कथया ज्ञायते यत् कथं जनाः स्वीय-भाषाणां संरक्षणार्थं प्रयासं नवाचाराणां च प्रयोगं कुर्वन्ति। धारचूला-प्रसंगोपरि मम अवधानम् आकृष्टम् यतोहि पुरा मया स्वीय-गमनागमन- प्रसंगे तत्र विश्रमः क्रियते स्म। तस्मिन् पारे नेपालः अस्मिन् पारे च कालीगंगा; तेन स्वभावतः धारचूला-संबद्धां वार्तां प्रति मम अवधानं सहजतया आकृष्टम्। पिथौरागढस्य धारचूलायां रंग-समुदायस्य बहवो जनाः निवसन्ति। एतेषां पारस्परिक-व्यवहारस्य भाषा रंगलो अस्ति। एते जनाः " अस्माकं भाषाभाषिणः सततं न्यूनतराः जायन्ते" इति विचिन्त्य अतिदुःखिताः भवन्ति स्म। तदा तैः स्वीयभाषायाः संरक्षणस्य संकल्पः कृतः। शीघ्रमेव अस्मिन् आन्दोलने रंग-समुदायस्य जनाः

संलग्नाः जाताः। अस्य समुदायस्य अनुयायिनां संख्या अतीव सीमिता अस्ति। अनुमानतः तेषां संख्या दशसहस्रमिता भवेत्। परं रंग-भाषायाः संरक्षणार्थं प्रत्येकं सदस्यः सक्रियः जातः। चतुरशीति-वर्षीयः वृद्धः दीवानसिंहः भवेत्, द्वाविंशति-वर्षीया वैशाली गब्र्याल वा। प्राध्यापकः भवेत् व्यापारी वा, समुदायस्य प्रत्येकमपि सदस्यः सर्वसंभवे प्रयासे संलग्नः जातः। अस्मिन् अभियाने जनसंचार-माध्यमानां अपि पर्याप्त-प्रयोगः कृतः। अनेके Whatsapp समूहाः सर्जिताः। शतशः जनाः तेषु संयोजिताः। अस्याः भाषायाः काचिदपि लिपिः नास्ति। केवलं संवादव्यवहारे एव अस्याः प्रचलनं भवति। अनेन जनाः कथा-काव्य-गीतानां प्रेषणं अकुर्वन्। परस्परं भाषाशोधनं कृतवन्तः। एक-प्रकारेण अखिलः Whatsapp समूहः एव कक्ष्या-कक्षः अभवत् यत्र प्रत्येकं सदस्यः रंगलोकभाषायाः संरक्षणस्य प्रयासे शिक्षकः विद्यार्थी च जातः। विविधानां कार्यक्रमाणां आयोजनं क्रियमाणं अस्ति, पत्रिकाप्रकाशनं क्रियते, अस्मिन् च अभियाने सामाजिक-संस्थानां साहाय्यं प्राप्यते।

मित्राणि! अस्मिन् सन्दर्भे विशेषेण उल्लेखनीयं यत् प्रवर्तमानं वर्षम् संयुक्तराष्ट्रसंघेन 'International Year of Indigenous Languages' रूपेण घोषितम् अस्ति। अनेन तासां भाषाणां संरक्षणार्थं प्रयासाः क्रियन्ते याः विलुप्यमानाः सन्ति। सार्धैक-शतवर्षपूर्वं आधुनिक-हिन्द्याः जनकेन भारतेन्दु-हरीशचन्द्रेणापि कथितमासीत्-

"निज भाषा उन्नति अहै, सब उन्नति को मूल,
बिन निज भाषा-ज्ञान के, मिटत न हिय को सूल ||"

अर्थात् मातृभाषायाः ज्ञानं विना उन्नतिः सम्भवा नास्ति। अस्मिन् सन्दर्भे रंग-समुदायस्य अभियानम् अखिल-विश्वस्य कृते मार्गदर्शकम् । यदि भवन्तः अनया कथया प्रेरिताः तर्हि अद्यैव स्वीय मातृभाषायाः उपभाषायाः वा प्रयोगं स्वयं कुर्वन्तु। परिवारं समाजं च प्रेरितं कुर्वन्तु।

एकोनविंशतितम्याः शताब्द्याः अन्तिमे काले महाकविना सुब्रमण्यम्-भारत्या यत्कथितं आसीत् तदस्माकं कृते अतीव प्रेरणास्पदमस्ति। सुब्रमण्यम् - भारती तमिलभाषायां अकथयत् -

मुप्पदु कोडी मुगमुडैयाळ

उयिर् मोइम्बुर ओंद्रुडैयाळ

इवळ सेप्पु मोळी पधिनेट्टूडैयाळ

एनिर् सिन्दनै ओंद्रुडैयाळ

एष एकोनविंशत्याः शताब्द्याः उत्तरार्धस्य प्रसंगः अस्ति। तेन कथितमासीत् यत् भारतमातुः त्रिंशत्कोटि-मुखानि सन्ति परं शरीरं एकमेवास्ति। एषा अष्टादशभाषाणां व्यवहारं करोति परमस्याः चिन्तनं एकमेवस्ति।

मम प्रियाः देशवासिनः, कदाचित् जीवने लघूनि वस्तूनि अपि महत्संदेशं प्रसारयन्ति। अहं संचारमाध्यमेषु जल-प्लवगानां एकां कथां अपठम्। एषा कथा प्रत्येकं भारतीयस्य कृते प्रेरणाप्रदा । विशाखापत्तने जल-प्लवगानां प्रशिक्षकाः एकदा मेंगा-मरिपेटा-तटे समुद्रात् प्रत्यावर्तमानाः आसन्। तदा समुद्रे कतिपयाः प्लास्टिक-कूपयः भस्त्राश्च तेषां पादैः तुदन्ति स्म। यदा ते स्वच्छीकरणे प्रयासं आरभन्त तदा अचिन्तयन् यत्कथं अस्माकं समुद्राः अवकरैः आपूर्यमाणाः सन्ति। विगतैः कतिपय दिवसैः एते जल-प्लवगाः तटात् प्रायः शतमीटरमितं गत्वा अवकराणां निस्तारणं कुर्वन्ति। महयं सूचितमस्ति यत् त्रयोदशेषु एव दिवसेषु उतवा सप्ताहद्वये एव प्रायशः चतुस्सहस्र-किलोप्यधिकः प्लास्टिक-अवकरः तैः समुद्रात्बहिष्कृतः। एतेषां जल-प्लवंगानां उपक्रमः साम्प्रतं अभियानरूपे प्रवर्तते । अधुना स्थानीयाः धीवराः अपि सर्वविधं साहाय्यं कुर्वन्ति। एतेषां जल-प्लवंगानां प्रेरणया यदि वयमपि स्वीय-परिवेशं प्लास्टिक-इति अभिघट्यावकरात् मोचयितुं संकल्पं कुर्यामः तर्हि अभिघट्य-मुक्त-भारतं विश्वस्य कृते नूतनं आदर्शम् प्रस्तोतुं शक्नोति।

मम प्रियाः देशवासिनः, दिन-द्वयानन्तरं नवंबर-मासीयः षड्विंश-दिवसः अस्ति। एष दिवसः अखिल-देशस्य कृते विशेषः अस्ति। अस्माकं गणतन्त्रस्य कृते विशेषतः महत्त्वपूर्णः अस्ति यतोहि एतद्दिनं वयं 'संविधान-दिनत्वेन' आयोजयामः। अस्मिन् वर्षे च संविधान-दिवसः विशेषतया महत्त्वं धारयति यतोहि एतत् संविधानाङ्गीकरणस्य सप्ततितमं वर्षम् अस्ति। अस्मिन् अवसरे संसदि विशेषायोजनं करिष्यते, अखिलवर्षं च विविधाः कार्यक्रमाः आयोजयिष्यन्ते। आगच्छन्तु! अस्मिन् अवसरे वयं संविधानसभायाः सदस्येभ्यः सादरं नमःपुरस्सरं श्रद्धार्पणं करवाम । भारतस्य संविधानं प्रत्येकं नागरिकस्य अधिकाराणां रक्षणं करोति। एतच्च अस्मदीयानां संविधान- निर्मातृणां दूरदृष्टितया एव सुनिश्चितीकृतम् । अहं प्रार्थयामि यत् एषः संविधानदिवसः अस्माकं संवैधानिक आदर्शाणां स्थायित्वं, राष्ट्रनिर्माणे योगदानार्थं अस्माकं प्रतिबद्धतां च सुदृढीकरोतु। एतत् एव स्वप्नम् अस्माकं संविधाननिर्मातृभिः दृष्टम् आसीत्।

मम प्रियाः देशवासिनः! शीतकालं आरभते। अल्पं शैत्यं साम्प्रतं अनुभूयते। हिमालयस्य कतिपयेषु भागेषु हिमास्तरणं आरब्धम् । परं एषः ऋतुः **"Fit India Movement"** इत्यस्य कृते अतीव समीचीनः अस्ति। भवन्तः, भवदीयानां परिवारं, मित्राणि अन्ये च एतत्सुअवसरं मोघं मा कुर्वन्तु। **Fit India** अभियानं अग्रे नेतुं अस्य ऋतोः अधिकाधिकं सदुपयोगं कुर्वन्तु। कोटिशः शुभकामनाः, भूयान्सः धन्यवादाः च ।

oo oo oo oo oo oo oo oo

- [भाषान्तरं – सर्वश्री-डॉ.श्रुतिकान्त-पाण्डेय-गवीश-द्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]
दूरभाषः - ९८१० ५६२२ ७७

अणुप्रैषः - baldevanand.sagar@gmail.com